॥श्रीगणेशायनमः॥ श्रीभास्करं वंदे॥ केशवो जयति॥ सोयं ग्रहकौतुकं रसकृतिं न आलनालं निधेः सिद्धिं जातकपद्धतिं सविवृतिं ताजीकपद्धतिं॥ सिद्धांतेषुप्रभृति पाठनिचयं मौहूर्तत
त्वानि यं कायस्थादिजधर्मपद्धतिमुखं श्रीकेशवार्यो करोत्॥१॥ तत्रेतद्धि मुहूर्ततत्त्वममलं संक्षिप्तसर्वाक्षरं गूढार्थं निखिलार्थमर्थबहुलं हेलावगम्यं विदां॥ मन्दानां खलु दुर्गमं खलु ततस्तेषां सुबोधाय
यथा नानाशास्त्रविशेषयुक्तिबहुलं तद्व्याकृतिं मारभे॥२॥ तन्मूहूर्तं निजपितृसमकुरु समाह्य संप्राप्य स्मृति मुरवसर्वशास्त्रबोधः॥ गुर्गीयागमचयदर्शनात् गणेशः पश्यन्तु विहसुजनाः सुकौशलं मे॥३॥
पुंगं॥ मुहूर्ततत्त्वगूढार्थघनध्वांतप्रणाशिनी॥ मुहूर्तदीपिका रम्या तनुटीका तन्यते मया॥४॥ अथ श्रीकौशिकमुनिश्रेष्ठवंशोद्भवः सकलविद्वद्विमचक्रमंडनः सकलागमाचार्यवर्यो ज्योतिर्वि
त्कुलावतंसोऽनेककलाकलापचतुरः श्रीकमलाकरदैवज्ञतनयः श्रीकेशवो ग्रहकौतुकादिगणितस्कंधं जातकपद्धत्यादिजातकस्कंधं चोक्त्वा संक्षिप्ताक्षरवचनैर्निबद्धं बह्वर्थं संहितास्कंधं चिकी
र्षुर्जन्मजन्मान्तरार्जितदुरितोत्सन्नमसूलनिरासेन ग्रंथसमाप्त्यर्थं समाप्तेपि ग्रंथे चरितार्थत्वे चाशिष्टाचारपरिपालनेन शिष्याशिक्षार्थं चाभिमतदेवतानमस्काररूपं मंगलमाचरन्॥
ग्रंथारंभमनुष्टुभा श्रीनिजानीते॥ गणाधीशं नमस्कृत्य ज्योतिषमवतारकं॥ मुहूर्ततत्त्वं वक्ष्येहं केशवोथाद्यशास्त्रतः॥१॥ अथेति ग्रहकौतुकं नटीकावर्णग्रहसिद्धांतिथिसिद्धि ग्रहभाजनगणितदीपिका
जातकपद्धतौ तट्टीका ताजिकपद्धतिसिद्धांतमासनाद्याः कायस्थाद्याचारपद्धति कुंडाष्टकलक्षणादि ग्रंथजातं निबंधनानंतरं अहं केशवो मुहूर्ततत्त्वं वक्ष्ये॥ मुहूर्तः किल द्विघटिकात्मकः काल विशेषः॥
तदुपचाराद्विवाहादिकार्यसमयो मुहूर्त इत्युच्यते॥ तस्य तत्त्वं याथार्थ्यं कथंभूतं ज्योतिषमवतारकं ज्योतिषस्य ज्योतिःशास्त्रस्य यः समाचारस्तदुत्पन्नं मुहूर्ततत्त्वं वक्ष्ये इत्यर्थः॥ अतो मुहूर्ततत्त्वमिति
ग्रंथस्यापि नाम भवति॥ केभ्यः आद्यशास्त्रतः। आद्यानां ब्रह्माचार्यवसिष्ठगर्गादीनां तदनुसारिणां वराहल्लादीनां च शास्त्राणि तेभ्यः स्वबुद्ध्याप्यचयितानि संगृह्य इत्यर्थः॥ अत्र तानां मदृच्यत्वाना
मपि गर्गादिमुनिवाक्यमूलत्वेन प्रामाण्यमिति भावः॥ किं कृत्वा॥ गणाधीशं महागणपतिं नमस्कृत्य मनोवाक्कायकर्मभिर्नत्वेति॥ अथ संबंधादिचतुष्टयमंतरेण शास्त्रारंभो नैव्यर्थप्रसंगः॥

तदुक्तं। सिद्धिः श्रोतृप्रवृत्तीनां संबंधः कथनाद्यतः॥ तस्मात्सर्वेषु शास्त्रेषु संबंधः पूर्वमुच्यते॥ किमेतदभिधेयं स्यादिति पृष्टः केनचित्। यदि नप्रोच्यते तस्मात्फलशून्यं तु तद्भवेत्॥ सर्वस्यैव हि शास्त्रस्य
कर्मणो वापि कस्यचित्। यावत्प्रयोजनं नोक्तं तावत्केन नगृह्यते॥ एवं द्वयोपदेशं हृदि मत्वा अनेनैव पद्येन संबंधादिचतुष्टयमुक्तं भवति॥ तद्यथा॥ आप्तशास्त्रं तदर्थत्वेन संबंधः सूचितः॥ ज्योतिष
व्यावहारिकमुहूर्तं तत्त्वमित्यनेनैवाभिधेयं सूचितं॥ तस्यास्य शास्त्रस्य प्रतिपाद्यप्रतिपादकसंबंधो वा॥ प्रयोजनं तु शुभाशुभदेशाः॥ तज्ज्ञः शास्त्रकारी॥ एतदुक्तं भवति॥ चतुराननमुखाद्विनिःसृतस्य
शास्त्रस्यास्य नारदवसिष्ठादिमुनिपरंपरयास्मिन्लोके प्रथितस्य ब्रह्मणश्च संबंधः॥ उक्तं च नारदेन॥ अस्य शास्त्रस्य संबंधो वेदांगमिति धातृतः रति॥ वेदांगमिति कृत्वा अस्य शास्त्रस्य धातृतः संबंधमित्य
न्वयः॥ यद्वा वक्ष्यमाणस्याभिधेयस्य तत्प्रतिपादकस्य शास्त्रस्य च प्रतिपाद्यप्रतिपादकत्वेन संबंधः॥ तत्र जन्मकरणतिथिवारनक्षत्रसंक्रांतिगोचरमथमार्तवगर्भाधानादिविवाहांतसंस्कारान्या
भानुराजाभिषेकयात्राजलयात्रागृहारंभगृहादिप्रवेशदीक्षादेवप्रतिष्ठाभिध्यायस्त्रीलक्षणपुरुषलक्षणस्वप्नारिष्टपल्लीपतनांगस्फुरणस्याध्यायवर्षसामान्यशुभाशुभवर्षण
मयूरचित्रकसूर्यादिग्रहचारग्रहयुद्धचंद्रसमागमकूर्मविभागमेघगर्भलक्षणरोहिण्यादियोगसद्योवर्षणलक्षणशकुनचारकेतुचारकाकनीडखंजनशुभाशुभसस्यजातककुसुमादिलक्षणार्घ
कांडउल्कापातोपसंहारऋतुस्वभाववैकृतउत्पातपरिवेषइंद्रचापप्रतिसूर्यनिर्घातदिग्दाहभूकंपरजोगंधर्वनगरउत्पातप्रतिमावैकृतअग्निवैकृतादिभौमोत्पातलक्षणादीनत्र प्रतिपाद्यत्वा १
दभिधेयाः॥ प्रयोजनं तु॥ जन्मजन्मांतरार्जितसत्कर्मपरिपाकरूपशुभाशुभसूचकनक्षत्रग्रहफल[illegible]आदिना जगतः शुभाशुभनिरूपणं॥ तत्राशुभफलस्य ग्रहशांत्यादिना ग्रहवध्योपेतसत्समये विवा
हादिसंपादनेन वा सप्रयत्नविधिनादिना बंधयिष्यतीति कृत्वा तन्निवारणं निरूपणं च॥ उक्तं च नारदेन॥ प्रयोजनं तु जगतः शुभाशुभनिरूपणमिति॥ तज्ज्ञोऽस्याधिकारी सद्द्विज एव॥ ननु शू
द्रादिः॥ वेदांगत्वात्॥ यतो द्विजैरेव सांगो वेदोऽध्येतव्यो ध्यातव्यः॥ उक्तं च॥ तस्माद्द्विजैरध्ययनीयमेतत्पुण्यं रहस्यं परमं च तत्त्वमिति॥ अध्यापने तु ब्राह्मण एवाधिकारी॥ क्षत्रियवैश्ययोरध्ययनं निक्षेपे

धानृ॥ महाप्रयोजनं तु येषां गाध्ययनेन धर्मपरिपालनताज्जगतोऽशुभनिराकरणेन च सुकृतसंचयेऽयं द्वारात्रिकालदर्शित्वेन च योगितुल्यावस्थागतस्य योगिवन्निरतिशयानंदप्राप्तिलक्षणमोक्षावाप्तिः॥ उक्तं
श्रीमद्भागवते॥ गर्गमुनिनंदेन॥ ज्योतिषामयनं साक्षाद्यत्तज्ज्ञानमतींद्रियं॥ प्रणीतं भवता येन पुमान्वेद परावरं॥ इति सिद्धांतेपि॥ यो ज्योतिषं वेत्ति नरः स सम्यक् धर्मार्थमोक्षाल्लभते यशश्च॥ गर्गोपि॥ ग्रंथतश्चार्थत
श्चापि कृत्स्नं जानाति यो द्विजः॥ अग्रभुक् स भवेच्छ्राद्धे पूजितः पंक्तिपावनः इति॥ अत्र सम्यक् पदग्रहणेन असम्यक् शास्त्रपरिज्ञानादयथाशास्त्रविवाहादिफलादेशकस्य पंक्तिदूषकत्वमस्तीति गम्यते॥ अत उ
क्तेनैव अविदितेवयः शास्त्रैर्दैवज्ञत्वं प्रतिपद्यते॥ स पंक्तिदूषकः पापो ज्ञेयो नक्षत्रसूचकः॥ नक्षत्रसूचको द्विष्टमुपवासं करोति यः॥ स व्रजत्यंधतामिस्रं सार्धं ऋक्षविडंबिना इति॥ ऋक्षविडंबिना नक्षत्रसूच
कृ५ केन॥ अत एव अयथाशास्त्रमादेशेनैव नक्षत्रसूचकः॥ न तु कृत्स्नशास्त्रपरिज्ञाता॥ दैवज्ञत्वं मध्यनरत्सुकृत्वात् हर्षजन्मांतरार्जितसदसत्कर्मविपाको दैवमित्युच्यते॥ तज्जानातीति दैवज्ञः॥ तस्य भावः
दैवज्ञत्वं॥ बृहस्पतिरपि॥ दैवज्ञैः शास्त्रतत्त्वैर्मुहूर्तो निश्चितो यदि॥ स मुहूर्तक्रमन्वेष्यो नान्यैर्नक्षत्रसूचकैरिति॥ अतः अयथाशास्त्रं फलादेशक एव नक्षत्रसूचकः॥ अत एव कृपया पेनये वेदपारगस्तारिसे
प्र० न नक्षत्रसूचकस्य प्राहुर्भोजनं निषिद्धत्वं स्मर्यते॥ अरिर्वित्रमहंता च संगो नक्षत्रसूचकः॥ काणः कुंठश्च मंदश्च श्वित्री दुर्नखः सु नवान्॥ सर्वे श्राद्धे नियोक्तव्या मिश्रिता वेदपारगैरिति॥ दोषोपि स्मर्यते॥
मामम्लेच्छितं चिकित्सां च ज्योतिषं धर्मनिर्णयं॥ विना शास्त्रेण यो ब्रूयात्तमाहुर्ब्रह्मघातकं॥ इति॥ अतोऽसम्यक् शास्त्रवेदिना इयथाशास्त्रफलादेशको नक्षत्रसूचकः॥ न तु शास्त्रफलादेशवेत्तेति सिद्धं॥
अत एवोक्तं गर्गादिभिः॥ वनं समाश्रिता येपि निर्ममा निःपरिग्रहाः॥ अपि ते परिपृच्छंति ज्योतिषां गतिकोविदं॥ मुहूर्ततिथिनक्षत्रमृतवश्चायने तथा॥ सर्वाण्येवाकुलानि स्युर्न स्यात्सांवत्सरो यदि॥ नासां
वत्सरिके देशे वस्तव्यं भूतिमिच्छता॥ चक्षुर्भूतो हि यत्रैष तत्र पापं न विद्यते॥ मुक्त्वा तस्मादिष्टापि॥ दुरादिनकृतं पापं हंति सिद्धांतवेत्ता त्रिदिनजनितमंहस्तंत्रवेत्ताभिहंति॥ करणभगणवेत्ता चैककाराशोष्ठ
पापं जनपतिसंलग्नं तु पापं चैकनक्षत्रसूची॥ एतत् केवलो नक्षत्रसूची नक्षत्रसूचकः॥ अतो स्य शास्त्रस्यैकदेशाध्ययनेपि त्रैवर्णिकस्याधिकारोस्तीति सिद्धं॥ तत्रापि आर्षनाम्नां तां पाठमात्रेपि फलम णा
स्तिस्मृत्यादिपठनवदिति॥ नन्वत्र यदुच्यते शुभमुहूर्तकृतं कार्यं सिद्ध्येदशुभमुहूर्ते तु न सिध्येत्तन्न युज्यते प्राचीनसदसत्कर्मस्यैव रूपे दैवस्य अवश्यं भावित्वात्॥ तथा च श्रोतकः॥ येन तु यत्।

प्रश्नं तस्य विधानं सुरेशसचिवोऽपि॥ यः साक्षान्निपुणिसः सोऽपि नशक्तोऽन्यथा कर्तुं॥ तद्धि ज्ञानोपायं लग्नविधानेन संप्रवक्ष्यामि॥ जन्मन्यथवा प्रश्ने वदेच्छेश फलं विवाहेऽपि॥ अतो यथोक्तविवाहादि
समयादेव पाकस्तानोपायाः॥ विवाहादिषु यादृशसमयावाप्तिस्तादृशं दैवमस्तीति ज्ञेयं॥ यत उक्तं तेनैव॥ वरणप्रदानपरिणयराचीप्रहजाभिषेककरणानि॥ सद्भे तिथौ सुलग्नेन भवंति किं लाभ्यु
ण्यानामिति॥ आतो विवाहादिशास्त्रं दैवसाधकमेवेति॥ मैवं सत्यकर्मण्यसे॥ विवाहादिषु विहितशुभकालस्य पुरुषप्रयत्नसाध्यत्वात्॥ सत्युभयसंयोगे कर्मसिद्धिर्न दैवेनेति॥ तदुक्तं कन्वार्केण॥
फलं यदि शास्त्रे नमे यतः किं कुर्यात्पुपायेषु परः प्रयत्नः॥ श्रुतिस्मृतिभ्यापि न्वर्णनिषेधविध्यात्मके कर्मणि किंनिषेधेति॥ यदि तु दैवमेव फलेत् तदा सर्वोऽपि जनः कृष्यादुपायेषु कथं प्रवर्तेत॥ किंच॥
श्रुतिस्मृत्यादयो निषेधविध्यात्मकाः निरर्थकाः स्युः॥ न वृक्षमारोहेन्न कूपमवेक्षेत न बाहुभ्यां नदीं प्रतरेत् न संशयमापद्येतेत्यादिना माध्वलायनवाक्यादिना श्रीकामः पुष्टिकामो नायत्यसंस
मांचरेत् इत्यादिया सत्यस्य वचनानां चिकित्साशास्त्रस्य च वैयर्थ्यप्रसंगः स्यादित्यर्थः॥ तथा च याज्ञवल्क्योऽपि॥ दैवे पुरुषकारे च कर्मसिद्धिर्व्यवस्थिता॥ तत्र दैवमभिव्यक्तं पौरुषं पौर्वदैहिकमिति॥
कर्मसिद्धिः फलावाप्तिरिष्टानिष्टप्राप्तिलक्षणा॥ सा च केवलं दैवेन न व्यवस्थिता अपि तु पुरुषकारेऽपि पुरुषकारः प्रयत्नः॥ अपि च॥ पुरुषकाराभावे दैवमेव नास्तीत्याह॥ तत्र दैवमिति॥ पूर्वजन्मार्जि
तं पौरुषमेव दैवमित्युच्यते॥ तच्च अल्पपुरुषकारानंतरं महाफलोदयेन अभिव्यक्तं॥ अत एवाहुर्वसंतराजः॥ पूर्वजन्मजनितं पुराविदः कर्म दैवमिति संप्रचक्षते॥ उद्यमेन समुपार्जितं तदा
वांछितं फलति नैव केवलं॥ तस्मात्प्रयत्नाभावे न दैवमस्तीति॥ अतो विवाहादिकाललक्षणो यत्नोऽविधातव्यः॥ तथा च नारदः॥ सर्वाश्रमाणामाश्रेयं गृहस्थाश्रममुत्तमं॥ यतस्तत्रापि योषायां शीलव
सांअनस्थितं॥ तस्याः सच्छीलल्लब्धिस्तु सुलग्नवशतः स्मृता॥ पितामहोक्तां संवीक्ष्य लग्नशुद्धिं प्रचक्ष्महे॥ दैवयत्नयोरन्यतरेण फलसिद्धिर्न भविष्यतीत्यत्र दृष्टांतमाह याज्ञवल्क्यः॥ यथा
ह्येकेन चक्रेण रथस्य न गतिर्भवेत्॥ तद्वत्पुरुषकारेण विना दैवं न सिध्यति॥ अत एव केशवार्योऽप्याह॥ सा कर्मबीजं सलिलानिलोर्वीसंस्कारवत्कर्म विधीयमानं॥ शोषायपोषाय च तस्य तस्मात्सदा

२

सदाचारवतां न हानिरिति॥ यत्प्राक्कर्म तस्य शेषाभावोपायश्च अधुना विधीयमानं कर्म मानं कर्म भवति॥ किंवत्॥ बीजं सलिलानिलोर्वीसंस्कारवत्॥ यथा सद्बीजं शुभैः सलिलादिसंस्कारैः संस्कृतं सदुन्नति॥
वर्द्धते च न दग्धं प्राक्कर्माग्निपतितं केन॥ प्रयत्नेन वर्द्धते॥ अन्यथा तु क्षीयते॥ तस्मात्कारणाच्छास्त्रविहितविवाहादिकालग्रहशांतिचिकित्सादिसद्व्यवसायेनैव नान्देणां सदा न हानिः स्यात्॥ अपि च॥ दैवं किल पुरुष
निष्ठं तद्देशकालानुवशात् एव विपच्यते॥ दुष्टमपि दुष्टसाहित्ये नैव दुष्टकारि॥ यथा दुर्जनोऽरं श्रान्वेषणेन॥ अत एवोक्तं श्रीपतिना॥ अकालवर्षी मृगया च ताहसं सु दूरयानं गजवाजियानं॥ त्यजेत्परे
यागमनं च वर्जयेद्भूतेषु राजा विषमेस्थितेषु दानि॥ वसंतराजोपि॥ येन दैवमिह येन दर्शितं पूर्वकर्म विहितं कुतोपि हि॥ देशकालवशगो विपच्यते सुज्यते श्रयहितं कथं नु तत्॥ एतेनैव दैवमात्मा
कंप॥ अतश्च दुष्टगफलं विवाहादि सत्समयादिरूपप्रयत्नेन निर्दिष्टते एव॥ यथाह स एव॥ सर्पवह्निविषकंटकादिकं एन दैवशरणोपि मानवः॥ दूरतस्त्यजति पौरुषं सदा तेन तस्य स्फुरति दैवतोधिकं॥ पौरु
षेण हृदये स्थितं भाति मा प्रयुंजति पुरुषाः सुमेधसः॥ यांति दैवशरणा तमेव यथा पावको ज्वलति दारु पावके॥ शकुनगोचरादिना अवेदितमशुभं दैवफलं शुभेन प्रयत्नेन वंच्यतं एव॥ तथाप्युक्तं वसंतराजः॥
तन्निरूप्य शकुने दुःखदं वंचयंति नियतं समुद्यतं॥ पौरुषेण पुरुषाः सुमेधसः संश्रयंति पुनरात्मनोहितं॥ नहूयफलं दुःखदं समुद्यतं शकुनेन निरूप्य पुरुषाः पौरुषेण वंचयंतीत्यन्वयः॥
ननु अनंतरोक्तैरेव सर्पवह्न्यादि दृष्टांतैः पौरुषमेव फलसाधनं कथं न स्यात्॥ उच्यते॥ समानभूमिषु समाने सलिलादिप्रयत्नेपि फलवैचित्र्यदर्शनात्कारणांतरं कल्प्यते॥ तदेव दैवमिति॥ अत
उभयप्रयोगे समेव फलसिद्धिरिति॥ अथ केचिद्बुद्धिः कर्मानुसारिणीति मन्यमानाः प्रयत्नोपि दैवानुरूप इति कृत्वा दैवमेव फलसिद्धेः कारणमिति मन्यन्ते॥ तन्न चतुरस्रं॥ अनवस्थादोषप्रसंगात्॥
तथाहि॥ प्राक्कर्माधिफलमेव कलिदैवमित्युच्यते॥ अत्र यः प्रयत्नः प्राचीनपौरुषलक्षणदैवेन जन्यते॥ तदपि पौरुषं तत्प्राचीनपौरुषजन्यं दैवं॥ अतः प्रयत्नोपि दैवप्रेरित इत्युपपन्नं॥ मैवं मन्यामहे॥
न खल्विय मतनवस्था दूषणं॥ अनादिसंसारे बीजांकुरन्यायदृष्टांतसद्भावात्॥ न चैतद्युक्तं नहि बीजांकुरन्यायेन दैवफलमिति निर्णीयते॥ नापि प्रयत्नः अतः सम्भयप्रयोगे फलसिद्धिरिति
मतं च चतुरस्रं॥ एवं चेन्नर्हि शौनकादिवाक्यानां का संगतिः॥ उच्यते॥ दैवं तु दृढकर्मरूपमदृढकर्मरूपं चेति द्विविधं॥ तत्र दृढकर्मरूपस्य अवश्यंभावित्वात्॥ ग्रहशांत्यादिरूपेण संपूर्णप्रय

त्नेनापि तन्निवारयितुं न शक्यते ॥ दृढमूलत्वात् ॥ खरतरवाताघातेऽपि दृढमूलपादपवत् ॥ अदृढकर्मरूपं तु प्रयत्नेन निवार्यते ॥ प्रशिथिलमूलपादपवत् ॥ तथा च ज्ञानदे ॥ ये धर्मकर्मनिरता विजितेंद्रिये ये पथ्यभोजनतुष्टा द्विजदेवभक्ताः ॥ लोके न रोगाद्धि नितेऽखलु शीलशीलं ते पामिदं कथितमायुरुदारधीभिः ॥ प्रयत्नाभावे तु विपच्यते ॥ तथा च ॥ तत्रैव ॥ पापिष्ठा ये दुराचारा देवब्राह्मणनिंदकाः ॥ अपथ्यभोजिनस्तेषामकालमरणं ध्रुवं ॥ अत एव चिकित्साशास्त्रेऽपि ॥ पूर्वजन्मकृतं पापं व्याधिरूपेण बाध्यते इति ॥ सर्वव्याधीनां साधारण्येन कर्मजत्वेऽपि साध्यासाध्यत्वेन द्वैविध्यमिति ॥ तत्रापि कृच्छ्रोपायः द्विविधः साध्यः सुसाध्यश्च ॥ असाध्योऽपि द्विविधोऽसौ याप्यो यश्चामतिक्रियः ॥ साध्या याप्यत्वमायांति याप्याश्चासाध्यतां तथा ॥ घ्नंति प्राणान् असाध्यास्तु नराणामक्रियावतां ॥ रसादिना अचिकित्स्यमाधे दृढकर्ममूलत्वमन्येषामदृढकर्ममूलत्वं निश्चीयते ॥ अतो दैवस्य दृढादृढत्वेन द्वैविध्यमस्ति ॥ अतः शौनकपाक्यानामप्यसमर्थः । येन तु रति ॥ येन पुरुषेण यत्नासमं तदवश्यंभोक्तव्यं दृढकर्मोपार्जितमिति यावत् ॥ अन्यथाकर्तुं बृहस्पतिरपि न शक्तः ॥ अर्थादन्यत् ॥ अदृढकर्मोपार्जितं अन्यथाकर्तुं शक्यं समर्थः ॥ वर्णाश्रमानेन तद्विज्ञानोपा ॥२॥ यमिति ॥ अत्रायं भावः ॥ यस्य परिणयादिकाल दुष्टं तस्य तिचाशदोसति तद्द्वैवपातकस्य तादृशामशुभफलमिति सान्तं ॥ उक्तं च विवाहपटले तेनैव ॥ एवं बुध्या मतिमान् भविष्यफलमादिशेत्सुमुहूर्ते ॥ अतो बोद्धायनादिविहितेन होमादिरूपधर्मेण क्षपयतेन न — वर्तते ॥ धर्मेण पापं नुदतीति श्रुतेः ॥ शुभकालेन तु अशुभदैवफलं निवर्तते शुभं तु वर्द्धते ॥ अत एव तेनोक्तं ॥ सुपरीक्षितं विलग्नं धर्मार्थसुखास्पदं पसोः ॥ नहि परीतं निमिषादनागतातीतकालेन ॥ अपरीक्षितं विलग्नं नहि देयं पण्डितेन दैवविदा ॥ अयशो बुधो निमज्जति शास्त्रमविश्लाघ्य यो दद्यात् ॥ रहस्यतिरर्षीन्द्रमाह ॥ स्वभावो दैवकालोयं शुभाशुभसमन्वितः ॥ अनादिनिधनः सर्वो न निर्देश्यो न निर्गुणः ॥ तस्मान्निर्दोषकालार्थं मुहूर्तमधिगच्छतां कालः शुभैर्गुणैर्युक्तो बलवान्द्विशुभप्रदः ॥ दोषैर्युक्तोऽपि वा प्राणैर्वृद्धिर्निःसंशयं द्वयोरिति ॥ अतः शुभकालबलेन पूर्वोक्तकर्मोपार्जितमशुभमपि निवर्तते ॥ इति सर्वमनवद्यं ॥ अतः सर्वकर्मसिद्ध्यर्थं तदारंभमुहूर्तोऽन्वेष्य इति सिद्धं ॥ यदुक्तं केशवेन

संक्षिप्तमतिद्विजहृदये॥ नानाविशेषैः सयोगैर्गणेशो थलन्नात्मजः॥ स्पष्टार्थं तत्र सर्वकर्मसु दुष्टतिथ्यादीनां वर्जनीयत्वात्तस्मात्प्रकरणमारभ्यते॥ तथ्यात्मनस्तासन्मूढत्वसदाचारसमर्पकार्यद्वयगाची
शिखरिणीवृत्तं नाबन्मयोच्यते॥ ॥सज्जनद्दुर्धिक्ष्ण्य दुर्युतिमपि सदा दुष्टहरणं समदृशे देहेरदुलदशामपि स्यासनपुजि॥ विधिक्षानां विभ्राद्विजपतिं बलंशाप्यकमलापतिं भाय त्रा ष्प्रस्वमलमनसा
सिद्धिमतुलां॥३॥ दुर्धिक्ष्ण्यं दुष्टनक्षत्रं दुष्टस्थानं च॥ धिक्ष्ण्यस्थाने तु हे भेगना विसुभिधानात्॥ दुर्युतीनां म्नैक्तिनादि दुष्टयोगं दुष्टसमागमः॥ दुष्टकरणं विष्ट्यादि॥ दुराचारं च॥ समदृशे सौम्यग्रह सहिते
सज्जनत्वं दसाहितेन च॥ देहेरुग्णो शारीरिच॥ खलदं पापदृष्टिं दुर्जनदर्शनं च॥ स्यासनपुजि सोम्यग्रहाधिष्ठानवन्ति कुशादिपुण्यासनपुलेत्व॥ विधिक्षानां देवविहितं विहितकर्म विद्याशासनं च॥ द्विजपति
बलं चंद्रबलं द्विजश्रेष्ठानां बलं च माप्य लक्ष्म्या कमलापतिं लक्ष्मीनारायणं नरस्मानं परमात्मानं च ध्यायन्नमलमनसा दृष्टमनसा विधानिरासेन शुद्धमनसा चे अनुलांमहर्नी सिद्धिंमूमाप्नु
सीयेवमर्षद्वयं॥ अथ तावत्सकलशुभाशुभकर्मसु साधारण्येन वर्ज्यमाह॥ दर्शसंक्रान्तिपातो परिघमुखदलं वैधृतिं पातयोगं विष्कंभाद्यानि नाडीः शुभकृति पुच षट् गंडयोः पंच शूले॥ व्याघाते वज्रके
काः पितृमृतिदिवसो नाधिमासान् कुलोरान् ज्वाल्यज्वमो स्म मासो ऽतिथिं खलुतिथिं क्षयमाधिमांच॥२॥ दर्शादीनि शुभकृत्सु अखिलेषु यत्नाद्वर्जयेदिति अन्वयः। इदमस्य प्रकरणमनुवर्तते॥
दर्शः अमावास्या। संक्रान्तिकालः पुण्याः मासे संक्रमा ऽपि परितः षष्ठघटिकादयादिनावक्ष्यमाणः। पातः व्यतिपातः अर्कयोः क्रान्तिसाम्यं तस्मात्प्रागपरकालो वर्ज्यः स्थितिघटिकाम कोष्ठगणिते नासिद्धः। पातास्थि
तिकालं न मंगलकृत्सु नरास्पतेन दृष्टः॥ यानि तु नारदवचनानि॥ यस्मिन्दिने महापातस्तद्दिनं वर्जयेत्सुधीरिति॥ तानि मुहूर्तान्तरसंभवे दिनमात्रानि॥ ग्रहगणितेनासन्नारूढः स्थितिघटिकामकः
कालः सर्वथा वर्ज्य एव॥ परिघमुखदलं परिघो एकोनविंशो योगः तस्य प्रथमार्द्धं। वैधृतिः सप्तविंशो योगः अखिलः। पातयोगः सप्तदशमः व्यतीपातयोगो ऽखिलः। विष्कंभाद्यास्तिनाडीः विष्कंभः प्रथमो योगः
तस्याद्याः प्रथमास्तिस्रो नाडीः। चः समुच्चये अतिगंड अगंड अगंडौ तयोः गंडयोः षट् घटिकाः शूले पंच घटिकाः व्याघाते वज्रके अंकाः नवनाडीः एते यांस्त्वेषां आद्या एव॥ पितृमृतिदिवसो ना

7

धिमासान्॥ माता च पिता च पितरौ तयोः मृतिदिवसौ। शुद्धाधिकस्य ऊनाधिकौ तौ च तौ मासौ च ऊनाधिमासौ क्षयमासाधिमासौ पितृमृतिदिवसे ऊनाधिमासौ च पितृमृतिदिवसौ ना-
धिमासास्तान् पूर्वदिनामन्त्रणपक्षे आमन्त्रणोत्तरं पूर्वदिनमपि वर्ज्यं अशुभकर्मारंभो शुभकर्मकर्मानुचितत्वात्॥ यद्यपि विध्यादिना क्षयदिने श्राद्धकरणं तथापि तद्दिने वर्ज्यमेव॥ अशुभत्वात्॥
शुद्धाधिमासौ संक्रांतिप्रकरणे वक्ष्यति। कुहोरां या पहोरां नाऽपंदचेति वक्ष्यमाणा॥ जन्मोऽथ मासोऽतिथि जन्मनिद्वंद्वं जन्मोऽस्य मासस्य उद्भव तिथिर्जन्म मासोऽतिथि जन्मोऽस्य च तन्मासोऽतिथिश्च
जन्मोऽस्य मासोऽतिथिर्द्वंद्वैकत्वं क्लीबत्वं च॥ जन्ममासो जन्मतिथिर्जन्मनक्षत्रं चेत्यर्थः॥ तथाहि॥ जन्ममासे न जन्मर्क्षे न जन्मदिवसेऽपि वा॥ आद्यगर्भसुतस्यापि दुहितुर्वा करग्रह इति बहुवचनप-
र्यालोचनया जन्ममासादिनिषेधः। सर्वथाज्येष्ठापत्यस्यैवेतरेषां तु सति संभवे॥ केचित्तु जन्ममासेऽपि पक्षभेदे विवाहादिकमिच्छंति। केचिज्जन्मतिथिरेव जन्ममासमपि छंति। केचित्सावनेन
मासेन केचित्सौरेणेत्यादि सर्वं चांद्रमासस्य मुख्यत्वात् प्रतिपदमारभ्य मासपर्यंते विवाहादिभिः प्रेक्षितमनोनादरणीयम्॥ शुक्रमाः शुक्रमां तिथिं च विगतः उद्गमो यस्याः सा शुक्रमा
तां सूर्योदयास्पर्शिनीं दिनक्षयमित्यर्थः॥ द्वौ उद्गमौ यस्याः सा शुद्गमा सूर्योदयद्वयस्पर्शिनीं दिनवृद्धिमिति यावत्॥ खलुतिभ्याये॥ अथ वर्ज्यांतराण्याह। हित्वा पुच्छत्रिनाडीर्गजकुरससगुणाद्रीषु ॥४॥
पंचाब्धियामे ८।१।६।३।७।२।५।४ अंते भद्रां क्रमेण सजसतिकुलवान्सेंदुपापोदमांशौ। दुष्टाहं यत्र सिद्धा शुद्धतत्क्षपि दिनं प्राकृत्यहं च ग्रहेस्ये होराभद्रे घटी यंशामे थ हरिगुरं चौज
शुक्रे पिते च॥३॥ क्रमेणेति मासमध्ये पतितानां चतुर्थ्यादिभद्राणां अष्टानां क्रमेण गजकुरससगुणाद्रीषुपंचाब्धि ८।१।६।३।७।२।५।४ अंते यामे षष्ठां यामानामंतेषु पुच्छत्रिनाडीर्हित्वा
८ अवशिष्टां भद्रां सजेदित्यन्वयः। भद्रानामसमर्पकरणं। तदानन्तरं ग्रहगणितेऽप्रसिद्धं॥ यथोक्तमाचार्येण ग्रहकौतुके। वर्तमानतिथिर्भक्ता द्विघ्ना सप्तावशेषकं॥ तिथेः पूर्वार्द्धकरणं
सैकेनत्स्यात्सरे दले॥ अतो मासमध्ये सप्तमभद्रा शुक्लचतुर्थ्यां तस्याः पुच्छं अष्टनयाभां ते घटिकासं॥ तिथिकालमष्टधा विभज्य तत्र यामोऽहेयः॥ एवं द्वितीया भद्रा शुक्लाष्टम्यां तस्याः पुच्छं

प्रथमयामांते नाडीत्रयं पुष्यं । द्वितीयाभद्रा शुक्ले द्वादश्यां तस्याः पुच्छं षष्ठयामांते नाडीत्रयं पुच्छं चतुर्थी शुक्लपंचदश्यां तस्यास्तृतीयप्रहरांते पंचमी कृष्णतृतीयायां तस्याः सप्तमयामांते षष्ठी कृष्णसप्तम्यां तस्याः द्वितीययामांते । सप्तमी कृष्णदशम्यां तस्याः पंचमयामांते । अष्टमी कृष्णचतुर्दश्यां तस्याश्चतुर्थयामांते इत्यर्थः ॥ सति शुभकार्ये सर्वत्र संबंधः । कुलवं पापग्रहलग्नं वारं रामेषसिंहादिकं ॥ सेंदुपापोदयांशो रंदुश्च पापलग्नं रंदुपापौ ताभ्यां सहवर्तमानौ संदुपापौ तौ च तौ उदयांशौ च संदुपापोदयांशौ ॥ सक्रूरं सचंद्रं लग्नं नवांशं चेत्यर्थः ॥ दुर्दुष्टाहं ॥ दुष्टं अकालजं देशदोषोपपरिवेषादिकं न दुष्टं यस्मिन् तत् दुर्दुष्टं च तत् अहश्च दुर्दुष्टाहः । तद्दुर्दुष्टाहं । राजाहःसखिभ्यश्चेति टच् नात्राहः पुंसि । एतदशुद्धंते । महाशुद्धंते तु महात् ग्रहणदिनमारभ्य अशुद्धं तत्र अशुद्धदिनमारभ्य ऋषिदिनं सप्तदिनं । महाशुद्धान्त्रिभूकंपादीनि । धूमकेतोरुत्पन्नस्याप्ति । ग्रहणे मतांतरमाह ॥ प्राक्त्र्यहं च परेऽहन्यपरं इति । ग्रहे ग्रहणे प्राक्त्र्यहं । ग्रहणदिनात्प्राक् त्रिदिनं चेत्सद्वैस्यवदंती सभ्याचार्यपरं सप्तदिनं पूर्वं त्रिदिनं चेत्यर्थः ॥ तथाचोक्तं ॥ त्रयोदश्यादितो वर्ज्यं दिनानां नवकं बुधैः ॥ मांगल्येषु समस्तेषु ग्रहणे चंद्रसूर्ययोः ॥ अहोरात्रमर्द्धं घटीमंतं । अहश्च रात्रिश्च अहोरात्री । समाहाराभावविवक्षितत्वान्न नचैकत्वं । तयोरर्द्धं तस्मिन्नर्द्धदिनदले रात्रिदलेच घटीत्रिंशं त्रिंशति पलानि ॥ तथाचोक्तं ॥ मूर्तः कालो निवसति महानिशायां दिनदलेऽथ स्यात् ॥ द्वादशपूर्वं द्वादशपरतस्तस्माद्वर्ज्यानि च पलानि ॥ अथ समुच्चये ॥ चौलमुख्ये चूडाकरणव्रतबंधादौ सिंहराशिस्थिते बृहस्पतौ गुरौ चेति शक्तीति नैचः ॥ तं मकरराशिस्थं तु सजेदिति सर्वत्र संबंधः ॥ आचोलात्प्राचीनेऽन्नप्राशनादिन दोषं इत्यर्थः सिद्धं ॥ केचित्सिंहांशस्थं शत्रुराशिस्थं वर्जयंति । तरेन्नत्सर्वे देशविशेषविषयं ॥ उक्तं च ॥ गोदावर्युत्तरे भागे यावद्भागीरथीतटं यामं ॥ तत्र विवाहो नेष्टः सिंहस्थे देवपतिपूज्ये ॥ नीचारिस्थे गुरौ वर्ज्यो मागधे बुध च सर्वदा ॥ नान्यदेशे प्रतिप्रावुर्वसिंहांशरिपुराशिराः ॥ केचित्तु लुप्तसंवत्सरमपि सजंति ॥ तद्यथा ॥ अतिचारगतो जीवस्तत्राशिं नैति चेत्पुनः ॥ लुप्तसंवत्सरो ज्ञेयो गर्हितः सर्वकर्मसु ॥ एकस्मिन्

रतो१

वत्सरे जीवः स्मृतो द्वादशि त्रयं यदि॥ लुप्तसंवत्सरो नाम सर्वकर्मसु निंदित इति॥ अयमपि दोषोऽयं देशे वार्हस्पत्यमानेन व्यवहारस्तद्देशविषयः॥ तथा चोक्तं॥ नर्मदोत्तरभागे तु वार्हस्पत्येन वत्सरः॥
तस्मात्तु दक्षिणे भागे सौरमानेन वर्तते इति॥ लुप्तवत्सरदोषस्तु पयोष्णीनर्मदान्तयोः॥ नान्यदेशेष्विति माण्डव्यवसिष्ठात्रिपराशराः॥ गर्गात्रिमाण्डव्यपराशराद्या भृगुंगिरःकश्यपशौनकाद्याः॥ लुप्ताब्ददो
षं प्रवदंति मध्ये सोमोद्भवायाः सुरनिम्नगायाः॥ अन्येपि गुरुभवा दोषाः॥ अतिचारगते जीवे वर्ज्यमेतदनंतरं॥ अनेहा गादि चूडायामष्टाविंशतिवासरान्॥ रसादयः एतेपि तद्देशविषयाः॥ अतो
आचार्येण नोक्ताः॥ सिंहराशिस्थगुरुदोषो जाह्नवीगोदादेशादन्यत्र नास्त्येव॥ परं तु यत्र देशे सर्वजनव्यवहारेण वर्ज्यते तद्देशे वर्ज्य एव॥ यथा अस्तदोष एव अन्येपि उक्तवक्ष्यमाणानां दोषाणां
देशकुलाचारतो व्यवस्था ज्ञेया॥ उक्तं च वराहेण॥ देशाचारस्तावदादौ विचिंत्यो देशे देशे या स्थितिः सैव कार्या॥ लोकद्विष्टं पण्डिता वर्जयंति दैवज्ञोतो लोकमार्गेण यायात्॥ इति॥ अथ नक्षत्रदो
षमाह॥ षण्मासं चाग्रहं वा ग्रहणभमशुभं पापयुग्युक्तभोग्यं योद्धौत्पातं च खेटैः प्रहतमथ सत्ससकदोषैर्व्य भोगात्॥ अग्न्यर्कीष्टषष्ठकुजरविरविजेज्यैः क्रमाल्लत्तितं भं पृष्ठेकाकूयुगे
भूम्नि तमगुनिखिलं दुर्नाशुभैः स्यात्तो ग्रहैः॥ ४॥ ग्रहणभं ग्रहणसंबंधि नक्षत्रं यस्मिन्नक्षत्रे ग्रहणं जातं तत् षण्मासपर्यंतं अशुभं स्यात्॥ शुभकार्ये इति सर्वानुवृत्तिः॥ आग्रहं वा ग्रहणमर्या
दीकृत्याग्रहं॥ वाशब्दोऽत्र अवस्थावाची एतदुक्तं भवति॥ षण्मासोर्ध्वं ग्रहणांतरे सति षण्मासमेव॥ षण्मासादर्वाक् सार्धे पंचममासे पक्षे वा ग्रहणांतरे सति ग्रहणपर्यंतमेव॥ एवं ग्रहणभं वर्ज्यमिति
पापयुग्युक्तभोग्यं पापा रविभौमादयः॥ तैर्युक्तं च भुक्तं च भोग्यं च पापयुग्युक्तभोग्यं पापग्रहाधिष्ठितं तत्पूर्वं परं चेति॥ केचित्तु राहुकेत्वोः शनितुल्यत्वेपि राहुणा सहितमेव केतुयुक्तं धूमितं चेत्यू
चुः॥ योद्धौत्पातं युद्धसंबंधि योद्धं॥ उत्पातास्त्रिविधाः॥ दिगक्षमांतरिक्षभस्कंपादयः तत्संबंधि औत्पातं॥ योद्धं च औत्पातं च योद्धौत्पातं॥ अत्र भगेकत्वविवक्षितत्वान्न द्विवचनं योद्धं वा औत्पातं चे

भौमादीनां परस्परयोगो युद्धमित्युच्यते॥ तत्र कूरजातो वा यस्मिन्दिने तद्दिननक्षत्रं षण्मासपर्यन्तं वर्ज्यमिति भावः॥ चः समुच्चये सर्वत्र संबध्नीयः। खेटैरपहतं भेदितं च खेटभ्यः खेटो
च खेटः अयं खेटः। खेटेन खेटाभ्यां खेटैर्वा भेदितं नक्षत्रं षण्मासपर्यन्तं वर्ज्यमिति भावः॥ अथ दोषमुक्तनक्षत्रस्य शुद्धत्वमाह॥ अथ सत्सत्क्रदोषेऽब्जभोगात्॥ अभानंतर्ये। सत्क्रदोषे नक्षत्रे अब्जभोगा
च्चंद्रभोगात् अनंतरनक्षत्रे सत् शुभं कार्यं स्यात्॥ सत्क्रदोषो येन तथा। दोषाः अनंतरोक्ताः ग्रहणादयः। तेषामुक्तदोषकाले सति तन्नक्षत्रस्य चंद्रभोगानंतरं संहिताद्रिपिके शुद्धत्वमुक्तं। तद्बहु
वाक्यविरोधात् वराहादिभिरुपेक्षितत्वात् आचार्येणाप्युपेक्षितं॥ सदोषनक्षत्रे अशुभकार्यं कर्मेति सिद्धं॥ अथ लत्तादोषमाह॥ अग्रेऽर्कात् षष्ठं कुजरविरविजेज्याः क्रमात् लाति तं भमिति॥
कुजादिभिः अग्रे क्रमात् आदिकं भं लाति तं स्यात्॥ नयथा अर्काश्च अश्वयषट्भज्ञकोष्ठषष्ठंनेषांशरकं अर्कात् षष्ठं भौमेन स्वाधिष्ठितभात् अग्रतस्तृतीयं रविणा द्वादशं शनिना अष्टमं गुरुणा
षष्ठमित्यर्थः। अग्रेतु निखिलं दुसभुक्तेः पृष्ठे क्रमात् अंकाकुसगेषु मितं भं लाति तं स्यात्॥ राहुणा स्वाधिष्ठितभात् पृष्ठतः नवमं पूर्णेंदुना द्वाविंशं बुधेन सप्तमं शुक्रेण पंचममिति पूर्णमांतपूर्णे
दुर्भवति तत्र यन्नक्षत्रं तस्मात् पृष्ठतो गणयेत् द्वाविंशं यद् तं त्वं चंद्रेण लाति तं स्यात्॥ तत् आगामी कृष्णपंचम्यां पक्षयां सप्तम्यां वा पतति॥ अथ लातितभस्य वर्ज्यचरणमाह॥ स्वेतोऽग्रिरिति स्यात
तस्माद्रिंप्रसजेति पूर्वानुयानि॥ योग्रहाधिष्ठितो नक्षत्रचरणस्तत्तुल्य एव लातितभस्य चरणं वर्ज्यमेवेदिसर्थः॥ तथा चोक्तं॥ उपग्रहे पुंनत्यापात तथा चंद्र युधा हये॥ ग्रहोस्ति यत्र साणं रोविद्धो शास्त
न्मा२ प्रमाणकरतिः॥ अत्र केचित् सविदः रज्जुमार्गेण सिध्यतोर्थस्य वक्रेण साधनायोगादिति न्यायमाश्रित्य अग्रगणनेनैव सर्वेषां लत्तां सिद्धामपि यद् उक्तं पृष्ठलत्तनं तत्र हेतुं वर्णयति॥ अग्रे प्रेरिता
अश्वस्य पृष्ठे लगति पृष्ठतः प्रेरिता लत्ता पृष्ठगस्य मुखे लगति अतः पृष्ठलातितस्य भस्य पूर्वार्द्धं दोषाधिक्यं उत्तरार्द्धे दोषाल्पत्वं। अग्रलातितस्य उत्तरार्द्धे दोषाधिक्यं पूर्वार्द्धे दोषाल्पत्वं अतः पृष्ठ
लत्तनमुक्तमिति तेषामाशयः॥ एतन्मध्यदेशे सौराष्ट्रे लत्तितस्य सर्वनक्षत्रस्य दोष इत्यत्र विशेषः॥ अधुना नक्षत्रवेधार्थमभिजिन्मानमाह॥ वैश्वांत्यांघ्रिः श्रवोध्यंशाद्यमभिजिद्धो

तीर्यगूर्ध्वाद्रिरेखे रोह्यग्न्याद्येषु विनोद्वाहमुडु परित्यजेत् खेटरेखांतविद्धं ॥ द्वंद्वे कोणे च रेखे परिणयनरतेऽप्यूर्ध्वरेखाग्निभाद्ये न्योन्यं चाद्यंतयोश्चाद्विभि नचरणयोर्वेधउक्तोऽपि केऽप्येतत् ॥ ५७ ॥
वेधश्च स्यादंशसाम्ये: श्रवणो धंयशाकः वेध्यांशसाम्ये श्रवणो धंयशाक श्च वेध्यांशसाम्ये श्रवणो धंयराकं तिष्य पुनर्वसोर्नक्षत्रद्वंद्वरूपतो न तिष्यपुनर्वसोरिति नरेतरेतरस्योगद्वंद्वे एकवचन शापुक्वात् गस्वर्वो
पिद्वंद्वो विभाषया एकवत्स्यादिति एकत्वं क्लीबत्वं च ॥ वेधमुत्तराषाढानक्षत्रस्य चरणः श्रवणः तस्य षोडशभागः वेध्यांशसाम्ये साहचर्यात् श्रवणाद्यषोडशांशगो गृह्यते तन्मितमभिजि
स्यात् ॥ अथोद्वाहकर्मण्यतिरिक्तसर्वकर्मसु सप्तरेखाचक्रे वेधमाह ॥ अथो तीर्यगूर्ध्वेति ॥ तीर्यकूर्चर्ध्वाश्च तीर्यगूर्ध्वाः ताः अद्रिरेखाः सप्तरेखाः यस्मिंस्तत्तथा ॥ तस्मिंश्चक्रे रोहिण्या
द्येषु खेटरेखांतविद्धं उडु परित्यजेत् ॥ रोहिणी ईशानी दिक् अग्निः कृत्तिका ओके इति स्वामिशब्दः सेवके प्रयुंजानाः दृश्यन्ते ॥ अतो देवताशब्दस्तन्नक्षत्रेषूपचर्यते ॥ तथाविधव्युत्पत्तियोगः कृशानावप्या
नागो द्वादशनाडीमितिर्दिक् पंचदशाजिस्तथा ॥ भूतोऽष्टादशनाडीजिदूर्ध्वमस्मादुत्तरा तिथिर्मितिः ॥ नागः पंचमी दिक् दशमी भूतश्चतुर्दशी ॥ अग्निः आद्यो येषां भानां तानि आग्नेयादीनि रोहिण्याः स
कारागदग्न्यादीनि यस्मिंश्चक्रे तत्तथा ॥ खेटस्य रेखा खेटरेखा तस्याः अंतस्तत्र विद्धं तत्तथा ॥ तीर्यगूर्ध्वाः सप्तरेखाः कृत्वा तस्मिन् सप्तशलाकके ईशानदिक्तः कृत्तिकादीनि साभिजिंति ॥ ५८ ॥
भानि विन्यस्य तत्र स्वस्वनक्षत्रे ग्रहान् विन्यस्य यन्नक्षत्रे ग्रहः तद्रेखायाः अंतस्थं यद्धिष्ण्यं तेन ग्रहेण विद्धमित्यर्थः ॥ तदुद्वाहं विनान्यत्र सर्वेषु शुभकार्येषु परिहरेत् ॥ अथोद्वाहे तु द्वंद्वे इति अक्षाः
पंच प्राग्वत्तीर्यगूर्ध्वरेखाभिः पंचरेखे चक्रे कोणे द्वंद्वरेखे कुर्यात् ॥ ईदृशे चक्रे ऐशान्यूर्ध्वरेखाग्निभाद्येषु ऐश्याः ऊर्ध्वरेखा ईशानकोणाद्द्वितीयरेखा तस्याः सकाशात् अग्निभादीनि कृत्तिकादीनि
यस्मिंस्तस्मिंश्चक्रे खेटरेखांतविद्धं उडु परिहरेदिति पूर्वानुवृत्तिः ॥ क्व परिणयने ॥ परिणयनग्रहणेन कन्यावरणवाग्दानवधूप्रवेशा गृह्यंते ॥ एतत्स्पष्टीकृतं श्रीपतिना ॥ वधूप्रवेशोद्वाने च

षष्ठ चतुर्थ द्वितीयाः पंचदशांशाः शनिकुलिकाः स्युः॥ वारेऽस्मिन् रात्रौ नास्ये वेलकं॥ अथार्द्धयाममाह॥ अथोरवेरर्द्धयामः॥ वेदाद्रिद्विद्विभाग्नं गामितिः रविमारभ्य चतुर्थ सप्तम द्वितीय कंच्य
माष्टम तृतीय षष्ठ अर्द्धयाम स्यात्॥ एकमानं मष्ट धाविभज्य अर्द्धयाम मानं स्यात्॥ रात्रावयं नास्ये वेलकमेन॥ एते कुलिकादयः क्रूरवेलादयश्च मांगल्ये दोषास्ते ज्ञातिनि विवाह प्रकरणे वक्ष्याति॥
अथ त्रिःप्रकारं गंडांत दोषमाह॥ उभयोः सालि की येदयोना देकापूर्णांत तो द्वे फणि धनुषमभांना कृतागडनाड्यः॥ अंसोमीनः अलिरीश्विकः कीर्क्के कर्कटस्ते षांमुदयो लग्नं तस्य अंतस्त
स्यात्॥ मीन वृश्चिक कर्कटलग्नां तात् उभयतः उभयपए काग उनाडीभवेत्॥ अर्द्धनाडीमाकू अर्द्धनाडी अपरतस्त्वेवमेका नाडीति एतल्लग्नगंडांतं॥ अथतिथिगंडांतं॥ पूर्णानां
पंचमीदशमी पूर्णिमासनाँमंतः उभयतः द्वे गंडनाड्यो स्तः॥ एकामाकू एका अपरस्त्रेति द्वे॥ अथ नक्षत्रगंडांतं॥ फणिभं अश्लेषा वृषा इंद्र स्तस्य भं ज्येष्ठा गमः अंतः तत्रभं रेवती
तेषामंताद् उभयतः कृताश्चतस्रो गंडनाड्यः स्युः॥ माग्द्वेश्चा द्वे एवं चतस्र इति अयमपि महादोषः इति वदंति॥ अथ दुर्मुहूर्ताज्ञं महादोषं विवक्षुर्दिवामुहूर्तान् रात्रिमुहूर्तांश्चा

क्ष्प ८

ह॥ आह्वीशः सार्पमित्रो पितृवसुसलिलं विश्वकोकश्च वज्री द्वाग्नि रक्षो बुनाथा यमभगमभयो धेभिजिधान रक्षः॥ रुद्रो जोध्न्या दिभे शाष्टकमदितिगुरौवि ष्णुनोवाश्व याष्यूरा
त्रौ तिथ्यंशपास्युर्निजभसमकृति दंड उक्ताः आदिचैषु॥ ८॥ अथ दिवसे एक मानस्य तिथ्यंशानां नाथाः क्रमेण ईशादयः स्युः॥ ईशो सर्पमित्रो प्रसिद्धौ पितरो अग्नि आत्मादयः वसवः प्रसि
द्धा देवो श्रेप्रसिद्धाः सलिलं जलं विश्वे च कश्च विश्वको अत्र देवता द्वयं विवक्षायां न बहुत्वं॥ विश्वाख्यायां दक्ष कन्यायां जाताः विश्वेदेव विशेषाः को ब्रह्मा पुनरपि को ब्रह्मा वज्री इं
द्रः अग्नी राक्षसौ ह्रीं एकेव देवता रक्षांसि राक्षसाः अंबुनाथो वरुणः॥ अर्यमा आदित्य विशेषः भगो रवि विशेषः एवं पंचदश मुहूर्ताधिपाः अर्द्ध दिनार्द्धे यो मुहूर्तो ऽष्टम रतियावत्॥

तस्मां राशौ संस्थिते सूर्ये चंद्रे वा नष्टद्धीपने ॥ अथ कालहोरामाह ॥ नाड्यां द्रलेति ॥ नाड्यां सूर्योदयात् गतनाड्यः भुजा तावेकस्य चनेअध्वखाश्वाश्चरं कृत्वा अध्याम्यरे खा स्य देशयोर्मध्यवर्तीनाव्याप
रयोजनात्मको मार्गः तस्य खाशाशाः अशांशसंज्ञो घटिकात्मकः चरपलात्मकं घटिकात्मकेन अध्वखाशांशाध्य चरेच अध्वखाशांश्चाचरं द्वेकलं मागवत ॥ एतदुक्तं भवति ॥ अध्वयोजनानां नामशी
घुइग घटिमकोरेखायाः प्राक् प्रतीच्याम् ऋणधनात्मकं यल्लगणितेम सिद्धः ॥ चरं च ॥ अस्य संगोलयोरिति ॥ उत्तरगोले ऋणं दक्षिणगोले धनं स्यात् तन्मैयोक्ते तेद्वे सूर्योदयात् गतनाड्यः भुजाः
ताः नाड्यः पमभाः द्विलनाः शरोत्पाः पंचभक्ताः लब्धं होरास्फुः ॥ इदं बहुसंमतं यल्लगणिते वासनासिद्धं ॥ अथ मतांतरे ॥ द्विघ्नरतिविगतःअर्कोयस्मादसौ मर्कः स चासौ उदयश्च मर्कोदयः
तस्मिन् सूर्योदलग्ने राश्यादिके द्विगुणे सति होरास्फुरि समन्ये वदंति ॥ ताः होराः क्रमपतेः दिनाधिपात् स्युः ॥ कथंभूताः ॥ इनसितसौम्येंदुमंदेज्यकौज्याः ॥ इनः रविः ॥ सितः शुक्रः ॥ सौम्यः बुधः ॥ इंदुश्चंद्रः ॥
मंदः शनिः ईज्यो गुरुः कुजो भौमः ॥ एतेषामिमास्तथा अनेन क्रमेण वारमारभ्य ताः कालिकहोरांगणयेदित्यर्थः ॥ अथोपग्रहे दोषे पुतिथिवारादियोगो ह्यात् वंगादिदेशे सुवर्ज्ययोगानाह ॥
वंगादौ पक्षतिर्सेर्क तिथि रिनादिने मित्रविश्वांबुपाश्वीद्रुक्षर्के क्षेचस्यमान्यतिदमपितिथो विश्वसंख्यास वारे ॥ मानुस्याच्छुक्रबालं त्रिदिन दशादिनं पक्षति स्याद्गुराविसेंषध्यं तेद्वपक्षं
गुरोर्द्वदशादिनमुभयोर्वा ग्रहं केऽपि नेष्टं ॥ ७० ॥ वंगादौ देशे सेबुधवारे पक्षतिः प्रतिपत् अर्क तिथिः सप्तमी इनदिने रविवारे मृतिदा स्यात् ॥ आदिशा हूहूणखशायोरपसंख्ये ह्यः ॥
वंगादौ सूर्यात् रविवारादिषु मित्रादिनक्षत्रं क्रमेण मृतिदं स्यात् ॥ मित्रश्च विश्वेच अंबुपश्च अश्विनौ च इंद्रश्च अहिश्च अर्कश्च तेषां ऋक्षं अनुराधोत्तराषाढा शततारा अश्विनी
मृगशीर्षाश्लेषा हस्ता इति वंगादौ देशे सवारे वारद्युक्तेतिथौ विश्वसंख्या त्रयोदशा संख्यापि मृतिदा स्यात् ॥ तद्यथा ॥ षष्ठ्यां शनिवारे द्वादश्यां रविवारे इत्यादि ॥ अथ गुरु
शुक्रयोर्बालत्ववृद्धत्वदिनान्याह ॥ मानुः पश्चाच्छुक्रबालमिति ॥ प्राक् च पश्चात् क्रमेण त्रिदिनदशादिनं उदयदिनमारभ्य शुक्रस्य बालं बालत्वं स्यात् ॥ पक्षं तस्य श

वार्धं स्यात्॥ पक्षभ्यंशश्च पक्षत्र्यंशोनम्नितं वार्धं तनथा॥ मागस्ते पक्षं पंचदशादिनं पश्चादस्तेभ्यंशः पंचदिनं अस्तादिना मूर्धाई स्यादि समर्थः॥ तेद्वे बाल्यत्ववृद्धत्वे गुरोः पक्षं पक्षं प्रमंस्तः॥ अथ
मतांतरमाह॥ उभयोर्गुरुशुक्रयोः प्राक्पश्चाद्दर्शने द्वे बाल्यत्ववृद्धत्वे दशादिनं स्तः॥ अथान्यमतांतरं॥ अशुभं सप्ताहं केपि केचन वदंतीति विशेषः॥ कथंभूतं तं नेष्टं अशुभमिति सर्वत्र संबंधः॥ अथ द
ग्धातिथीनाह॥ दग्धायुग्मा द्वितीयादिरपि च झषयुक्चापउक्षाद्य कुंभे ऽलीराजेद्वंद्वषष्ठे ह्यलिरविभवने तौलिनक्रे च सूर्ये॥ आद्याः सौम्याजभूर्वे पुच्छजलधिमिताः पंचमीतच्चतुर्थी साम्यान्यन्ये षु
नद्वंद्वथविधुक्षितिश्रुते कंप्रतंरद्वताच॥ ११॥ मेषचापादिकेद्वयेसूर्ये सति क्रमेण द्वितीयादियुग्मातिथिर्दग्धास्यादि सन्वयः॥ झषयुक्चापे मीनसहिते धनुषि मीने धनुषिस्थितेर्के द्वितीया दग्धा
एवंउक्षाद्यकुंभे वृषसहिते कुंभे चतुर्थी॥ अलीराजे कर्कमेषयोः षष्ठी मिथुनकन्ययोरष्टमी तौलिनक्रे तुलमकरयोर्द्वादशीत्यर्थः॥ अथ पापयोगान्विबिद्वतिथीनाह॥ आद्यास्तिः॥ उद्येण सहवर्तमानाः
सौम्याः सेचते अजमुखभृश्च सौम्याजमुखाः॥ तेषु मेषादिषु चतुर्षुपामस्तहितेषु अनुक्रमेण आद्याः जलधिमिता अनुर्मितास्तिथयः साम्याः॥ एतदुक्तं भवति॥ मेषेसपापे प्रतिपत्पंचमी च साम्याएवं
वृषे द्वितीया पंचमी च मिथुने तृतीया पंचमी च कर्कटे चतुर्थी पंचमी च॥ एवं सिंहे षष्ठी दशमी अनुक्रमेण सर्वास्तिथयो लेयाः॥ अथ चंद्रबालत्ववृद्धत्वे आह॥ अथ विधुविंशुतेति॥ विधुश्री ॥१२॥
श्रुता चंद्रस्य बालत्वं एकदिनं स्यात्॥ यस्मिन् सायंकाले चंद्रो जनैर्दृश्यते तदारभ्य सूर्योदयपर्यंत इत्यर्थः॥ तस्मात् सायंकालात् प्राक् सास्यद्दृष्टोपि चंद्रमाः अस्तंगत एव वाच्यः॥ उक्तं च॥ द्विपांतरस्थो
विफलोपितावद्या वन्न दृष्टो नयनाध्वनीनः स्यात्॥ अहंदिनं विधोः वृद्धताच स्यात्॥ यत्रोषसि चंद्रो जनैर्दृश्यते तदारभ्य प्राकृत्रिदिनमित्यर्थः॥ दर्शसंक्रांती सारभ्य एतदंतं शुभकृति युजन्मादिसनु
वर्तते॥ विशेषं तु तत्प्रकरणे वक्ष्यति॥ नानाशास्त्रकलाकलापचतुरः श्रीकेशवो देवविल्लक्ष्मीजानिरवाप्तकीर्तिरवनौ मौहूर्ततत्त्वं प्रधात्॥ अस्मिंस्तत्तनुभूगणेशरचिते तस्यामलेप्रस्फुटेऽभात्तत्र
ख्याने निरगादिदं प्रकरणं साम्याभिधानं शुभं॥ इति श्रीसकलागमाचार्यवर्यश्रीगणेशदैवज्ञविरचितायां मुहूर्ततत्त्वटीकायां साम्यप्रकरणं॥ अथ तिथिवारप्रकरणमारभ्यते॥ तत्र साम्य
प्रकरणोक्तं षोडशोषादिकं साम्यत्वादुक्तं॥ अधुना नानावत्तिथिषु कर्तव्याकर्तव्यान्याह॥ नंदाभद्राजयारिक्ता समफलतिथयो रिक्तपूर्णे पुनस्ताः स्त्रीमांसक्षौरतैलं पितृवसुशिवषष्ठीषु वर्ज्यं

क्रमेण॥ श्रीपर्णीलाबुत्रवल्लान्वसुमुखतिथिषु सेव्यमसूरं तिलानि मोक्षाय सद्वर्गहोरासु च सशुभतनौ सत्कृतिश्योयउच्या॥१२॥ तिथिशब्दस्य पुंल्लिंगत्वात्पुंस्त्वविवक्षितं॥ अरव्याभिः स
मानानि फलानि यासां ताः अरव्यासमफलाः तिथयः अनं पूर्णतिथिषु स्वनामसदृशानि कार्याणि कुर्यादित्यर्थः॥ नंदासु चित्रोत्सवेति। भद्रासु विवाहभूषणपौष्टिकराकृत्यानि॥
जयासु संग्रामेति॥ रिक्तासु विद्विद्बंधघातेति॥ पूर्णासु मांगल्यविवाहयात्रापौष्टिकशांतिकादीनि॥ दर्शे स्कसर्वकृत्येषु निषिद्ध एव॥ अथ विशेषेण वर्ज्यमाह॥ स्त्रीमांसक्षौ
रतैलमिति॥ स्थादिकंपि आदितिथिषु क्रमेण वर्ज्यं॥ स्त्रीसेवनं मांसभोजनं क्षौरं क्षुरकर्म तैलं अभ्यंगे भोजने च॥ पितरो दर्शदेवताः अंतस्तच्छब्देन दर्शो गृह्यते॥ तदुपचारात्साप्त॥
वसवो षष्ठ्यौ अष्टमी शिवश्चतुर्दशी पक्षयोरसिद्धेति॥ १अथ वर्ज्यान्तराण्याह॥ श्रीपर्णीलाबुत्रवल्लानीति॥ वसुमुखतिथिषु श्रीपर्णीन्युक्तानि॥ सजेत्॥ श्रीषं नालिकेरं। अलाबुः कपालं अंत्रं
पटोलं। वल्लाः नखाः। मसूरमसिद्धं॥ तिलानि रंताकानि। अन्यानपि प्रतिपदादिषु निषिद्धानि शास्त्रांतरोक्तानि॥ कूष्मांडबृहतीफलानि लवणं वर्ज्यं तिलाम्लं तथा तैलं चामलकं दिवं
प्रसवत्तां शीर्षकपालांत्रं॥ निष्पावाश्च मसूरिकाफलमथो रंताकसंज्ञं मधु द्यूतं स्त्रीगमनं क्रमात्तिथि प्रतिपदादिष्वेवमाषोडश॥ अथ वारकृत्यं॥ नक्षत्रमंगेन सग्रहलग्नादिकृत्यं तदाह॥
मोक्षाय सद्वर्गेति॥ शुभेन सह वर्तमानं सशुभं तस्मिन् तनुश्च सशुभतनुः अहः दिनं वर्गश्च होरा च दिनं च वर्गहोरादिनानि तानि सत्तानि तानि सद्वर्गहोरादिनानि तानि च सशुभतनुश्च
तस्मिन्तनुः वर्गा ग्रहहोरादयो वक्ष्यमाणाः होरा कालहोरा मोक्षादिने वारः सतां सौम्यग्रहाणां वर्गहोरादिनानि सौम्यग्रहयुक्तलग्नं च सत्कृतौ शुभकृत्ये प्रोक्तं॥ वधबंधाभिघातविषा
ग्निशस्त्रोच्चाटनादिकं उदयेषु प्रोक्तं॥ पापवर्गे पापहोरायां पापवारे सपापलग्ने चेत्यर्थः॥ अथ तिथिदेवताभिर्ग्रहदेवताधिदेवताश्चाह॥ वह्निः कोमा गणेशाहि गुह रवि शिवाश्च उका

19

कालविघ्नेविष्णुःकामेशाचंद्रास्तिथिपतयश्चेमाधिपतंपितॄणां॥ शंभूमेस्कंदविष्णूविधिसुरपयमाः कालचित्रोग्रहेशाश्चाधीशावह्निर्नोयक्षितिहरिसुरपाः शच्यतः कामिकास्युः॥२५

इमेवक्ष्यमाणतिथीनांप्रतिपदादीनांपतयःस्युः॥ वह्निरग्निःकोब्रह्माउमागिरिजा।गणेशःप्रसिद्धः अहिर्नागः गुहःस्कंदः रविशिवौप्रसिद्धौ चंडिकादुर्गाकालोयमकः विश्वेवि-

श्वेदेवाः विष्णुःप्रसिद्धः कामोमदनः ई शोभ्यंप्रसिद्धौ॥ अमापाः दर्शस्याधिपतयः पितॄणां दर्शस्वामिनः पितर इत्यर्थः॥ एताः पुराणदृष्टाः मवहारे पठिताज्योतिःशास्त्रेप्यर्थैः

पठिताः॥ अन्याअपिज्योतिःशास्त्रसंमताः मयूरात्पेक्ष्यप्रसिद्धत्वान्नोक्ताः॥ अथग्रहाणांरव्यादीनांशंभ्वादयोऽधीशाःस्युः॥ वह्न्याद्यधीशाश्चस्युः॥ वह्न्याद्यश्चप्रसिद्धाः॥

सुरपइंद्रःशचीइंद्राणी॥ अनंतःअस्मादनेनरं कोब्रह्माअहिःनागः कोब्रह्मा एतास्तुसर्वशास्त्रसंमताः॥ नानाशास्त्र० मयाप्रकरणंवारस्तिथ्यास्तथा॥ इतितिथिवारप्रकरणं॥

अथक्रमप्राप्तंनक्षत्रप्रकरणमारभ्यते॥ तत्रादौनक्षत्रदेवताः श्रीपतिनापठिताः सोकस्यार्थमाह॥ भेशाइ त्वयमाग्निधातृशशिनः शर्वोदितिर्वाक्पतिः कद्रुजाः

पितरोभगोर्यमरविःत्वष्टावायामारुताः॥ शक्राग्नीतथमित्रइंद्रनिर्ऋतिस्तोयंचविश्वेविधिर्गोविंदोवसवोंबुपाजचरणोहिर्बुध्न्यपूषाभिधाः॥ स्पष्टार्थमेतत्॥ अथन- ॥१०

क्षत्रेषुउग्रादिनक्षत्राण्याह॥ उग्रंपूर्वारपिभांतकमग्निजिदिनाश्वीज्यभेज्यंलघुःस्यात् क्षिप्रंचाजनयादिसुनिलविष्णुचरंसाससचित्रेंदुमैत्रं॥ युक्तोमैत्रोमृदुश्चो

नरकभयुग्मिनःस्यात्स्थिरेशोमिराधा॥ युक्तोमिश्रोथमूलाहिमघवशिवभेदारुणःस्तीक्ष्णअर्कः॥ ध्रुवास्तिस्रः आरोभौमवारः पित्र्यमघाअंतकोभरणीसमाहारे

द्वंद्वैकवत्॥ एतदपक्षद्वंद्वउपसंहारस्यात्॥ सर्वत्रदेवतानिर्देशोनऔपचारिकं॥ तत्तिथिनक्षत्रादिकंतिथिनक्षत्रादिषुग्रहणेप्रयुक्तं॥ नागोद्वादशाना

ऊनि दूषय सुतरां तिथिं॥ इति प्रयोगदर्शनात्॥ अभिजित्प्रसिद्धः इन अश्विनो च ईश अश्व तेषां भानि हस्ताश्विनी पुष्याः॥ ईज्यो गुरुवारः मैऐ सच कं लघु क्षिप्रं च स्यात्॥
अजः श्रवणः तद्दादिनयं अदितिः अनिलः स्वातिः विधुश्चंद्रवारः पित्र्यमघा अंतकोभरणी द्वंद्वैकत्वं एतत्सैकं चरं स्यात्॥ असुरे रेवती चित्रा प्रसिद्धाः इंदुर्मृगशिरः मित्रो
नुराधा एभिः एभिः सह वर्तमानः शुक्रः मैत्रः मृदुश्च स्यात्॥ उत्तरा॥ त्रीणि नक्षत्रवाचकत्वात् क्लीबत्वं॥ कः भब्रह्मभं रोहिणी ताभ्यां युगिनो रविवारः स्थिरः स्यात्॥ अग्निः
कृत्तिका राधा विशाखा ताभ्यां युक्तो बुधवारः मिश्रः स्यात्॥ मूलः प्रसिद्धः अहिर्नागः मघवा इंद्रः शिवो रुद्रः तेषां भानि तैर्युक्तः अर्किः शनिर्दारुणस्तीक्ष्णः स्यात्॥ अ
थ येषु उग्रादिषु कृत्यमाह॥ एषु स्वास्वोक्तकार्यं स्मृतम् अथ रविजे प्यायसंस्थे यदीक्षा सूर्ये लाक्षादि रोगो बधमथ वरुणक्षेप्यति तीक्ष्णे षु मध्यं॥ भूपेक्षाविभ्रमुखे स्थिर
मृदुलघुभे थभकार्यं विधेयं हस्तादिश्वश्विपुष्यादि तिशुभमुदितं सेंदुवारोदयस्थे॥२॥ स्वेन उग्रादिना नाम्ना उक्ते नक्षत्रे स्वनामसदृशं मिस्यर्थः॥ तद्यथा॥ उग्रेषु उग्रं कार्यं
शात्वनाशविषघात बंधनोच्छेदशास्त्रदहनादि॥ एवं लघुषु॥ पण्यभूषणकलालनौषधशानज्ञानगमनादि॥ चरेषु॥ इति वाजिकरभोक्षवाहनारामयानं॥ मृदुषु
मित्रकार्यरति भूषणांबर गीत मंगलादि॥ स्थिरेषु॥ बीजहर्म्यनगराभिषेकारामसंगहादि॥ मिश्रेषु॥ मिश्रं॥ तीक्ष्णेषु॥ भूतप्रेतनिधि मंत्रसाधने भेदबंधवधादि॥ अथ श
निरविवारयोः कृत्यांतरमाह॥ अथ रविजे प्यायसंस्थेति॥ रविजे शनिवारे आप्यसंज्ञे हकर्मस्थे यं स्थिर कर्म ग्रहप्रवेशास्तंभ प्रतिष्ठादि दीक्षा वेश्मादिकामेत्रादि दीक्षा॥
सूर्ये रविवारे लाक्षादि रोगो लाक्षामंजिष्ठ कौसुंभादि रसरंजनं औषधं प्रसिद्धं॥ अथ मध्यारंभमाह॥ अथ वरुणक्षेप्यति तीक्ष्णेषु मध्यमिति॥ वरुणक्षं शततारा उग्राणि प्रतीयं

21

मघाभरणीभौमवाराः तीक्ष्णानि॥ मूलाश्लेषाज्येष्ठार्द्राशनिवाराः एतेषु मद्येमयारंभादि॥ मद्यकार्यं स्यात्॥ अथ राजदर्शनमाह॥ भूपेक्षा इति। विष्णुयुग्मे श्रवणधनिष्ठे॥
स्थिराः सदा निशाशुक्लानि एषु भूपेक्षा राजदर्शनं स्यात्॥ अथ गजकार्यं॥ अथेभकार्यमिति॥ हस्तचित्रास्वात्यश्विनी पुष्यपुनर्वसुषु गजकार्यं विधेयं॥ अथ कार्येषु यानि नक्ष
त्राण्युक्तानि तानि केन ग्रहेण युक्तानि ग्राह्याणि सत आह॥ भमुदितमिति॥ अत्र सर्वकार्येषु यदुक्तं नक्षत्रमुदितं तत्सेंदु इंदुसहितं उदयस्थं लग्नस्थं वा तेषां॥ चंद्रसहितं नक्षत्रं
तद्दिननक्षत्रमिति प्रसिद्धं॥ तदलाभे उदयस्थं वा॥ तद्यथा॥ वृषलग्ने दशभागानंतरं रोहिण्युदयः॥ यावद्विंशतिकलाधिकत्रयोविंशतिभागास्तावद्रोहिणी उदयस्था तस्मि
न् रोहिण्युदये सति रोहिण्यामुदितं कर्म वस्त्रधारणादिकं कार्यमेव॥ एवमन्येष्वपि॥ अथाभ्यंगकर्माह॥ स्वात्यादित्यां वै स्वचांद्रौ बुधवसुलघुभेभ्यक्तिर्येति॥ स्वातीपुनर्वसु
रेवतीमृगशततारा धनिष्ठाश्विनी पुष्याभिजिद्धस्तेषु अभ्यक्तकर्म स्यात्॥ अथ जलाशयादि॥ अंबाशयाद्यमिति॥ अनुराधाहस्तपुष्यरोहिणीमूलशततारा उत्तरा धनिष्ठासु ॥११॥
अंबाशयाद्यं वापीकूपतडागादि खननं बंधनादिकं स्यात्॥ अथ नृत्यमाह॥ अथ नेर्द्धसमैत्रेयैंद्रयुक्ते इति॥ तैः जलाशयोक्तनक्षत्रैः उत्तराभाद्ररेवतीज्येष्ठाभ्यां युक्तैः नृत्यं
स्यात्॥ तैरिति नक्षत्रैः लुप्तसादिना तृतीया॥ नेर्दृक्षेत्र्युक्ते काले नेषु नक्षत्रेष्विति यावत्॥ पुष्येण गच्छेदिति वत्॥ एवमन्येऽपि सर्वत्र ज्ञेयं॥ अथ गोक्रियामाह॥ क्षिप्र
द्वीशांत्यशाक्रादिति वसुवसुवरुणे गोक्रिया यं चिना शुभ्रनामा ताः क्रूरवितु सुस्थिरमपि हरिभं सार्द्धि सोमांभ्य केष्विति॥ क्षिप्राणि अभिजित् तारानि द्वीशं इंद्रदैवतं विशाखा
ज्येष्ठाणि प्रसिद्धानि एतेषु दशसु नक्षत्रेषु गवां क्रयविक्रयादिकं च स्यात्॥ अथ भूतामाहानि अष्ट अष्टमी भूतश्चतुर्दशी अमा दर्शाः ता क्रूरचित्राविष्णुः श्रवणः स्थिराणि

रोहिणी श्रुत राणि हरिभं सिंहलग्नमथवान्यं चेद्विसर्भः ॥ भं नक्षत्रं ग्रहं च धिष्ण्यमोको निवसनमिसन्निधानात् ॥ अतो भराद्येन लग्नमुच्यते ॥ तत्रिक्षेत्रं गृहर्क्षभानि भवनं चैका
र्थ सिंहमलपाशति वराहोक्तेः ॥ अथ मतांतरं ॥ श्रीकीर्ति ॥ कृष्मिलार्किलामांश्च बुधरानि सोमवारा श्चने साह ॥ एतान्सप्तम्यादीन्निगदां क्रयादो जनिनिषिद्धान् ॥ विशेषतः
स्थानमये रागमनेषु ॥ अर्थादन्यानि शस्तानि मध्यमानि ॥ अत्र गोक्रियादौ बुधादयो निषिद्धवाराः प्रागुक्ताः ॥ अतः स्थिरसंज्ञवारविचारोपि निषिद्धं मासतः । सत्तु निषिद्धे पुन
र्याह्यः ॥ वाराणां पृथगुपादानात् ॥ एवं वाराणां यत्र यत्र पृथग्ग्रहणमस्ति तत्र तत्रोयादि ब्राह्मणा अपि भौमादिवानग्राह्याः एवं सर्वत्र ॥ अथ कृषिकर्माह ॥ मूलद्वीशेन्द्रपित्र्य
ध्रुवमृदुचरभक्षिप्रभे स्यात् कृषिस्ते रुद्रिवीजादिबुजे पोरगुभतरहगो सृष्टिविम्बेकविंशे ॥ मस्तेकेभत्रयं सत्फणिवलयमद्वन्न प्रोक्तिनक्षत्रि बद्दोत्र श्रुती श्रुत्रिरामाण्यशुभं
मारभानि क्रमाल्लांगलाख्ये ॥ ४ ॥ मूलद्वीशेन्द्रपित्र्यध्रुवमृदुचरभक्षिप्रभैः स्यात् कृषिरिति ॥ मूलविशाखाज्येष्ठा मघा रोहिणी सुत्तरा चित्रा रेवती मृगानुराधा श्रवण धनिष्ठा
शततारका पुनर्वसु अश्विनी पुष्य हस्ताभिजित्सु कृषिः कर्षणं स्यात् ॥ अथ बीजोप्तिमाह ॥ ते रुद्रिवीजादिबुपाजेरिति ॥ अथ तैः कृष्युक्तैः रेकविंशति नक्षत्रैर्वी
जादिबुपाजे मेषा श्रवणशततारा विशाखे तैरसिः बीजोप्तिः स्यात् ॥ बीजोप्तिनक्षत्रे फणिचक्रमप्याह ॥ अशुभतरहगो सृष्टिविम्बेकविंशा प्रत्येकसंत्रयं सत्स्यात् ॥
राहुभुक्तनक्षत्रमारभ्य नवमालयं त्रयोदशालयं सप्तदशत्रयं एकविंशत्रयं एवं द्वादश नक्षत्राणि शुभानीत्यर्थः ॥ फणिचक्रे फणिवलये फणिचक्रे
भुभूभित्रीणि गते त्रयं चेत्यादिनोक्तं नव यानि शुभानि तान्येवोक्तानीत्यर्थः ॥ अत्राभिजिद्ग्रहणं नास्ति सप्तविंशतिन्यासवशात् ॥ अन्यदपि बीजोप्तिचक्रे

देवश वल्लभो कमस्ति तत्रार्कनक्षत्रमारभ्य ततीयार्द्धिन्य शो एकोनविंशद्दशे च शुभानि स्फः॥ शेषाणि द्वादशादुष्टानि॥ अत्राभिजिन्न नास्ति अष्टाविंशति
न्यास वशात॥ अथ कर्षणे लांगलचक्रे शुद्धिनक्षत्रमाह॥ दिनेनभो क्षितं सकं यन्नक्षत्रं तस्मात् त्रि ३ वह्निः ३ त्रि ३ इषु ५ त्रि ३ इषु ५ त्रि ३ रामाणि ३ क्रमात् अशुभ शुभ
मानिस्फः॥ रविभुक्तनक्षत्रात्त्रीणि अशुभानि तस्मात्त्रीणि शुभानि ततस्त्रीण्यशुभानि ततः पंच शुभानि च स्फुः॥ ततस्त्रीण्यशुभानि ततः पंच शुभानि ततस्त्रीण्य
शुभानि ततस्त्रीणि शुभानीत्यर्थः॥ कलांगलारम्भे वलये लांगलचक्रन्यासस्थानि उक्तानीत्यर्थः॥ लांगलचक्रोक्तिस्मात॥ कर्षणे एतद्विलोक्य मित्यर्थः सिद्धं॥ रामाणीसु
त्रनक्षत्रसंबंधवशात् कुर्वीवं॥ विवक्षितं॥ लांगलचक्रे तु अकाकां तगताशतानी यादिना श्रीपतिनोक्तं॥ अत्राभिजिन्नाम नास्ति सप्तविंशति न्यासवशात्॥
एतश्लोकं लांगलचक्रवीजो मि नक्षत्रयो मर्षिविचिताधर्ज्योतिषार्केषु कः॥ क्रमोक्रमात्त्रिवेदेषु गोदिक्रुद्रार्क विश्वभेः॥ कृष्णी कृषिष्ठभाथो भिस्तत्तीयाः कृशभिस्त भा॥
अथ धुनि क्षेत्रराद्रिं दिपंच केनिषिद्धान्याह॥ कुंभांत्ये दीनकाष्ठो अयमरावदहनेनालपाछादनंनो याम्येयात्रानशय्या वितति रथ कभाद्धंध मंदार्ध सद्धकं॥ शास्त्रा
पासासि द्रस्थितिगतहुति कृच्चाथ दूलेप्रि भूखुस्नातां बाधितहेषा विसद्दशा महिभस्नानहोमैर्श्यरमतिः॥ ५॥ कुंभांत्ये दीनकाष्ठो अयमरावदहनेनालपाछाद ॥१२॥
नंनो याम्येयात्रानशय्यावितति रिति॥ कुंभांसे कुंभमीनो तत्र रंध्रे सति काष्ठो अय पादिनकार्यं॥ काष्ठानामुच्चयो रचनं संग्रहादि॥ शावदहनं गृहमस्थानं याम्ये
दक्षिणे देशे यात्रागमनं शय्याशः वितति: वितननं॥ अथांधादिनक्षत्राणि तत्फलं चाह॥ अथ कभाद्रोहिणी नक्षत्रमारभ्य अंधमंदार्धसद्धस्यात्॥ अंधामंदा

अर्द्रासती दृक्‌यस्याः तत्र भारोहिणी अंधा मृगो मंददृक् आर्द्रा अर्धदृक् पुनर्वसुः सर्वदृक् एवं पुनः पुनः पुष्यादीनी अन्नाभिजिद्गणनीयः । अष्टाविंशतिगणितत्वात् ॥ अथैषां
फलं ॥ कथंभूतं अंधादि ॥ मासायासासिदूरश्रुतिगतहृतिकृत् ॥ मासिः सद्यो लाभः आयासासिः कष्टेन प्राप्तिः दूरश्रुतिः दूराच्छ्रवणं ॥ गतस्य नष्टस्य हृतिः न प्राप्तिः ताः करो
तीति मासायासासिदूरश्रुतिगतहृतिकृत् ॥ गतस्येति सर्वत्रापि संबंधनीयं ॥ तेन अंधादिनक्षत्रेषु नष्टस्य वस्तुनः प्राप्तिः कष्टप्राप्तिः दूरश्रवणं अप्राप्तिः क्रमात्स्या
दित्यर्थः ॥ अथ मूलाश्लेषयोर्जातस्य फलमाह ॥ अथ मूलांघ्रिप्रसूतस्तातांबावित्तहेष्टो विसदृशाम् अहिभे स्यान्नतो मेभ्यः शांतिः ॥ मूलनक्षत्रे प्रथमादिषु अंघ्रिषु उत्पन्नो
जातः क्रमेण तातांबावित्तहेष्टो भवति ॥ तातश्च अंबा च वित्तं च तातांबावित्तानि तानि हंतीति तथा ॥ प्रथमचरणे पितृहंता ॥ द्वितीये मातृहा तृतीये वित्तहंता चतुर्थे
इष्टः शुभः इति ॥ तस्मिन् जाते सति स्यान्नतो मेभ्यः शांत्या दुष्टोपरामः स्यात् ॥ एतत्फलं ॥ अहिभे अश्लेषानक्षत्रे विसदृशं विलोमं स्यात् ॥ तस्यापि दुष्टोपरामः स्यात् ॥
तद्विधिः शौनकबौधायनाद्युक्तो ज्ञेयः ॥ ग्रंथगौरवान्न लिखितः ॥ अथ वस्त्रधारणं ॥ चंद्रे क्षीणे शुभैः कंटकसुतनवसंस्थैश्च पापैस्त्रिलाभारिसंस्थैः धार्यं दुकूलाद्यम
पि शुभनररेहेमरोप्यादि के च ॥ इति वस्त्रधारणकुंडलिका ॥ पौष्णादिसादिपंचाश्विभवसुशुभेन द्वादशसंस्थाक्षालनाद्यं हित्वा षष्ठीं च पर्वाण्यशुतराणि दिनं श्राद्धघस्रं
शुभं स्यात् ॥ इति वस्त्रक्षालनं ॥ दध्यात्तप्याद्यरिक्ते श्विदितिवसुगुरुद्वर्के पंचधिष्ण्यंशे वासोसास्वर्कपंचोडुवसुभिरतुणे हेमशंखमवालं ॥ स्त्रीहेमाद्यं कुजेथो नव
वसनमसद्वृत्ते मध्यत्रिभागे रोगा स्नानं भुवादिषु निलकणिमयसंसितेंदू विना स्यात् ॥ स्त्रीहेमाद्यं कुजे इति वासः दध्यात् धारयेत् ॥ कस्मिन् तिथौ तत्र यः तेभ्यः
तेषां अहः तस्मिन् सत्स्वादि बुधगुरुशुक्रवासरे । समासांतविधेरनित्यत्वान्नानच् ॥ अरिक्ते रिक्त अतिरिक्ततिथौ ॥ कैः अश्विन्यादिभिः अश्विनी अदितिश्च वसवश्च
गुरुश्च तेषां उडूनि अर्कात् हस्तात् पंचधिष्ण्यानि प्रागुक्तानि न तु रविवारः वाराणां प्रथमत्वात् असंरवती एभियुक्ते काले तृतीया प्रागवत् ॥ अथ रक्तवस्त्रादौ विशे

॥श्रीगणेशायनमः॥
२७

तार्तीयिकसिद्धजातकपद्धतिपत्रे १३